दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-9 ■ वर्ष-5 ■ अङ्क-330 | 1 | सितम्बर 19, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

वि.सं. २०८३,
कलियुगाब्धः ५१२७ शरद्-ऋतुः
सूर्यः दक्षिणायनम् भाद्रपदशुक्लाष्टमी
आश्विन् 03 प्रविष्ठांशः मङ्गलमयः भवेत्

**2** शानन्-जलविद्युत्-प्रकल्पः हिमाचलस्यैव, अस्य प्राप्तये कृतसङ्कल्पाः स्मः; प्रकल्पात् राज्यं लप्स्यते पञ्चशत-कोटि-रूप्यकाणि – मुख्यमन्त्री

**4** ऊना मण्डले भाषा-संस्कृति-विभागेन राजभाषा-हिन्दी-पक्षोत्सवस्य अवसरे मण्डलस्तरीय-प्रतिस्पर्धानाम् आयोजनम्

**9** मधुबनीनगरे मिथिलालोकचित्र-कलायाः नवसत्रस्य शुभारम्भः




## विदेश-मन्त्रिणा डॉ. एस. जयशङ्करेण भूटानस्य विकासात्मक-प्राथमिकतानां कृते भारतस्य पूर्ण-समर्थनम् पुष्टितम्। द्विपक्षीय-सहयोगस्य उभय-हित-सम्बद्धानां विषयाणां च विहिता समीक्षा

विदेशमन्त्री डा. एस्. जयशङ्करः भूटान् देशस्य विकासलक्ष्याणां प्राथमिकतानां च कृते भारतस्य समर्थनं पुनः दृढीकृतवान्। षोडशतः अष्टादश सितम्बर पर्यन्तं भूटानदेशस्य आधिकारिकयात्रायां, डा. जयशङ्करः तस्य भूटानी-समकक्षीयः ल्योनपो डी. एन्. धुङ्ग्येलः च द्विपक्षीय सहयोगस्य सर्वान् पक्षान्, परस्पर-हित-सम्बद्धान् क्षेत्रीय-अन्ताराष्ट्रिय-विषयाञ्च समीक्षितवन्तौ। उभौ पक्षौ भारत-भूटानयोः विशेष-बहु-पक्षीय-सहभागित्वस्य सुदृढीकरणस्य प्रगतिं प्रशंसितवन्तौ। मन्त्रिणा यू. पी. आई-आधारित-सौकर्यस्य परिचालनस्य अपि स्वागतं कृतम्, येन भूटानी-नागरिकाः भूटानी-चलदूरभाषीय-तन्त्रांशस्य उपयोगेन भारते आभासीय माध्यमेन धनानि प्रेषयितुं समर्थाः अभवन्। डॉ. जयशङ्करः भूटान्-देशस्य राज्ञा जिग्मे खेसर नामग्येल् वांग्चुक् अथ भूटान् देशस्य प्रधानमन्त्रिणा दाशी शेरिंग् तोबगे इत्युभाभ्यां मिलितवान्।

## अद्यतनीयं सुभाषितम्

**सर्वतीर्थमयी माता,सर्वदेवमयः पिता।**
**मातरं पितरं तस्मात्,सर्वयत्नेन पूजयेत्।।**

भावार्थः- मनुष्य के लिए माता सभी तीर्थों के समान तथा पिता सभी देवताओं के समान पूजनीय होते हैं। अतः उसका यह परम कर्त्तव्य है कि वह माता पिता का अच्छे से आदर और सेवा करे।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

## एच.ए.एल. संस्थानेन भारतीय-वायुसेनायै तेजस-एल.सी.ए. अथ एच.टी.टी.-40 प्रशिक्षक-विमानानि समर्पितम्

केन्द्रीय-रक्षामन्त्री राजनाथ सिंहः बेङ्गलूरु-नगरे हिन्दुस्तान-एयरोनॉटिक्स लिमिटेड् इत्यनेन निर्मितानां विविध-विमान-प्रणालीनां भारतीय वायुसेनायै अथ च पवनहंस-संस्थायै समर्पण-समारोहं स्वोपस्थित्या अलङ्कृतवान्। सार्वजनिक-क्षेत्रस्य विमान-निर्माण संस्थानं एच.ए.एल. भारतीय वायुसेनायै द्वे एल.सी.ए. एफ.ओ.सी. प्रशिक्षक-विमाने, पवनहंस-संस्थायै चत्वारि ध्रुव नेक्स्ट जनरेशन उदग्रयानानि, अथ च वायुसेनायै प्रथमं एच.टी.टी.-40 प्राथमिक-प्रशिक्षक-विमानं समर्पितम्। अवधेयमिदं वर्तते यत् दशाधिकद्विसहस्रतमे वर्षे षोडश एल.सी.ए. योद्ध-विमानानां सहैव एफ.ओ.सी.-प्रारूपे चतुर्णां द्वि-आसन-युक्तानां विमानानां क्रयण-अनुबन्धः सम्पादितः आसीत्।



## जापान-देशे प्रवृत्ते एशियायी-क्रीडा-महोत्सवे भारतस्य नवागतेन टेकबॉल-क्रीडकेन क्विन्सी-जोआकिम-डीसूजा इत्यमुना उपान्त्य-चक्रे प्रवेशः सम्प्राप्तः

जापान-देशस्य आइची-नागोया-नगरे समायोज्यमाने विंशतितमे एशियायी-क्रीडा-महोत्सवे भारतस्य क्विन्सी-जोआकिम-डीसूजा इत्येषा महिला एकल-स्पर्धायां विजय-द्वयं सम्प्राप्य टेकबॉल-क्रीडायाः उपान्त्य-चक्रे प्रविष्टवती।



## रक्षामंत्री केरलम राज्यस्य कोच्चि-नगरे "वन् ऐपिक्, मैनी स्टोरीस्-रामकथा कान्क्लेव्" इत्यस्मिन् भागम् अगृह्णात्

रक्षामंत्री केरलम राज्यस्य कोच्चि-नगरे "वन् ऐपिक्, मैनी स्टोरीस्-रामकथा कान्क्लेव्" इत्यस्मिन् भागम् अगृह्णात्। सः अवदत् यत् भगवतः श्रीरामस्य कथा सम्पूर्ण एशियाक्षेत्रे विस्तृता अस्ति, ग्रामेषु नगरेषु च प्रतिबिम्बिता अस्ति। रक्षामन्त्रिणा रक्षाक्षेत्रे आपरेशन् सिन्दूर् इत्यादीनां उपलब्धीनां विषये अवधानं प्रदत्तम्। नागरिकाणां जीवनं परिष्कर्तुं उद्दिष्टानां विविध-कल्याणकारी योजनानां विषये अपि सः अवदत्। आपत्काले वार्तापत्राणां भूमिकां अपि सः अस्मरत्। सः अवदत् यत् बद्धाः वार्तापत्रिकाः जनानां पक्षं स्वीकृतवत्यः ।



# महाराष्ट्रस्य मुकुटबन-गडचान्दूरयोः मध्ये नूतन रेलमार्ग निर्माणाय रेलमन्त्रालयेन त्रिनवत्यधिक-चतुश्शत-कोटि-रूप्यकाणां परियोजना स्वीकृता

दक्षिणमध्यरेलमार्गस्य मुकुटबन-गडचन्दूर-नगरयोः मध्ये प्रायः अष्टत्रिंशत् किलोमीटरमितं यावत् नूतनस्य रेलमार्गस्य निर्माणार्थं भारतीयरेलविभागेन त्रिनवत्यधिक-चतुःशतकोटिरूप्यकाणां परियोजनायाः अनुमोदनं विहितम्। रेलमन्त्रालयः अवदत् यत् नूतनः रेलमार्गः लघुतरं दक्षतरं च रेलमार्गः प्रदातुं शक्नोति, येन यात्रा-दूरतायाः, परिवहन-समयस्य, तत्सम्बद्धव्ययस्य च न्यूनता भविष्यति। इदं विद्यमानस्य वर्धा-मानिकगड-खण्डस्य सङ्कीर्णतायाः निवारणार्थं वैकल्पिकमार्गोऽपि प्रददाति, येन वस्तुपरिवहनं इतोऽपि सुगमं भविष्यति। भारतीय रेल-विभागेन महाराष्ट्रस्य चौक-कर्जत-रेल-खण्डस्य कृते सप्तनवत्यधिक चतुःशतकोटि-रूप्यकाणां व्ययस्य द्विगुणीकरणं स्वीकृतम्। अयं निर्णयः महाराष्ट्र-राज्ये रेल-क्षमता-संवर्धनार्थं, रेल-परिचालनाभिवृध्यर्थं च अभवत्। रेलमन्त्रालयः अवदत् यत् चौक-कर्जत इति खण्डः पनवेल-चौक-कर्जत इति मार्गस्य भागः अस्ति, यत् यात्रिणां वस्तुपरिवहनस्य च महत्त्वपूर्णः मार्गः अस्ति।

## भारतेन रक्त-सागर-क्षेत्रे वर्धमानां सुरक्षा-विषमिकामालक्ष्य गभीरा चिन्ता प्रदर्शिता

भारतेन रक्त-सागर-क्षेत्रे वर्धमानां सुरक्षा-विषमिकामालक्ष्य गभीरा चिन्ता प्रदर्शिता। नवदेहल्यां वार्ताहर-सम्मेलने एकस्य प्रश्नस्य उत्तरं प्रददता विदेश मन्त्रालयस्य आधिकारिक-प्रवक्त्रा रणधीर-जयस्वालेन विज्ञापितं यत् भारतेन सऊदी-अरब-देशस्य सार्वभौम-क्षेत्रे, विशेषतः नागरिकानाम् आर्थिक-सम्पत्तीनां चोपरि कृतानाम् आक्रमणानां दृढं खण्डनं कृतम्। तेन प्रतिपादितं यत् पवित्र मक्का-नगरीं लक्ष्यीकृत्य सञ्जातस्य आक्रमण-प्रयासस्य अनन्तरम् अपि भारतेन आधिकारिकं वक्तव्यं निर्गतम् आसीत्। भारतीय-युद्धपोतेन सह पाकिस्तानीय-नौसेना-पोतस्य परस्परं सङ्घर्ष-विषये विदेश-मन्त्रालयस्य प्रवक्ता अवोचत् यत् भारतेन स्वकीय-प्रतिवादस्य उत्तरत्वेन पाकिस्तानेन दत्तस्य प्रत्युत्तरस्य संज्ञानं गृहीतम्।

## जम्मू-कश्मीरस्य उधमपुर-मण्डले ऑपरेशन-सोहन इत्यस्यान्तर्गतं सुरक्षा-बलैः द्वौ जैश-आतङ्कवादिनौ व्यापादितौ, विपुल-मात्रायां शस्त्रास्त्राणि च स्वायत्तीकृतानि



उत्तरसेना-सेनापतिः लेफ्टिनेण्ट् जनरल् प्रतीक शर्मा इत्येषः उधमपुरे आपरेशन्-सोहन इत्यस्यान्तर्गतं जैशेत्यस्य द्वयोः आतङ्कवादिनोः हननार्थं व्हाइट-नाइट-कॉर्प्स इत्यस्य प्रशंसाम् अकरोत्। सेनायाः उत्तरसेना-सेनापतिः लेफ्टिनेण्ट-जनरल प्रतीक-शर्मा, उधमपुर्-जनपदस्य माजलता-क्षेत्रे आपरेशन-सोहनस्य समये व्हाइट-नाइट-कॉर्प्स इत्यस्य द्रुतं, सुनिश्चितं, व्यावसायिकं च कार्याचरणाय प्रशंसाम् अपि अकरोत्। जम्मू-कश्मीरस्य आरक्षकैः सी. आर्. पी. एफ्. इत्यनेन च सह अविच्छिन्नसमन्वयेन सम्पन्नं गुप्तसूचना-आधारितं सफलम् अभियानम्, भयोत्पादन-निरोध-ग्रिड् इत्यस्मिन् संयुक्त-अन्तर-संस्था-समन्वयस्य शक्तिं पुनः एकवारम् अधोरेखितम् अस्ति। सफलप्रक्रियया जैश-इत्यस्य भयोत्पादकद्वयम् उन्मूलितम्, एकः ओ. जी. डब्ल्यू. निगडितः, अपि च शस्त्राणां विस्फोटकानां च प्राप्तिः अभवत्।

## वैश्विक-ऋण-मूल्याङ्कन-संस्थया मूडीज् इत्यनया वर्तमान-वित्त-वर्षाय भारतस्य वास्तविक जी.डी.पी.-वृद्धि-पूर्वानुमानं संवर्ध्य सप्त-प्रतिशतं निर्धारितम्

वैश्विक-ऋण-मूल्याङ्कन-संस्थया मूडीज् इत्यनया वर्तमान-वित्तवर्षे भारतस्य वास्तविक सकल-घरेलू-उत्पादस्य विकास-मानाङ्क-पूर्वानुमानं षट्-प्रतिशततः संवर्ध्य सप्त-प्रतिशतं यावत् विहितम्। संस्थया स्पष्टीकृतं यत् अयं ऊर्ध्वमुखी-संस्कारः पश्चिम-एशिया-सङ्घर्षेण जनितात् वैश्विक-आघातात् परमपि भारतीय-अर्थव्यवस्थायाः प्रत्यस्थताम् दृढतां च प्रदर्शयति। मूल्याङ्कन-संस्थानुसारं जी-20 समूहेषु सर्वेभ्यः देशेभ्यः अपेक्षया भारतस्य आर्थिक वृद्धिः तीव्रतरा भविष्यति। मूडीज्-संस्थया उल्लिखितं यत् षड्विंशत्यधिक-द्विसहस्रतमस्य वर्षस्य प्रथमार्धे वार्षिक दृष्ट्या भारतस्य वास्तविक जी.डी.पी.-वृद्धिः अष्ट-दशमलव-द्वि-प्रतिशतं प्राप्ता, या पञ्चविंशत्यधिक-द्विसहस्रतमस्य वर्षस्य समानावधौ सप्त-दशमलव-त्रि-प्रतिशतं आसीत्।

## शानन्-जलविद्युत्-प्रकल्पः हिमाचलस्यैव, अस्य प्राप्तये कृतसङ्कल्पाः स्मः; प्रकल्पात् राज्यं लप्स्यते पञ्चशत-कोटि-रूप्यकाणि — मुख्यमन्त्री

हिमसंस्कृतवार्ता — हमीरपुरम् ।

मुख्यमन्त्री ठाकुर-सुखविन्दरसिंहसुक्खू-महोदयः दृढतया उद्घोषितवान् यत् जोगिन्दरनगर-स्थितः शानन-जलविद्युत्-प्रकल्पः सर्वथा हिमाचलस्यैव अस्ति, इमं च राज्यं प्राप्यैव स्थास्यति। अस्मात् प्रकल्पात् प्रदेशाय प्रतिवर्षं प्रायः पञ्चशत-कोटि-रूप्यकाणां (५०० कोटि) राजस्वम् उपलप्स्यते, येन जन-सुविधासु महती अभिवृद्धिः भविष्यति। पञ्जाब-सर्वकारः अस्य प्रकल्पस्य समर्पणे विघ्नम् उत्पादयति, किन्तु हिमाचल-सर्वकारः स्व-अधिकारं प्राप्यैव विरमिष्यति। एतदर्थं देशस्य प्रख्याताः विधिवेत्तारः (अधिवक्तारः) नियोजिताः सन्ति। गुरुवासरे नादौन-विधानसभा-क्षेत्रस्य प्रवास-काले मुख्यमन्त्री अवदत् यत् विपक्षः अधिवक्तॄणां शुल्केषु व्यर्थाः टिप्पणीः करोति; किन्तु यदि ५०० कोटि-रूप्यकाणां राजस्व-प्राप्तये किञ्चित् धनम् अधिवक्तृभ्यः दीयते, तर्हि अत्र किमपि अनुचितं नास्ति। शताधिक-कोटि-रूप्यकेभ्यः प्राप्तेभ्यः सत्सु राज्ये स्वास्थ्य-सेवाः, शिक्षा-क्षेत्रं, सर्वाङ्गीण-सुविधाश्च संवर्धयितुं शक्यन्ते।

## किशाऊ-परियोजनायां हिमाचलस्य हितानि सुरक्षितानि

किशाऊ-बहुउद्देश्यीय-परियोजनायाः सहमति-पत्रं लक्ष्यीकृत्य भाजपा-दलस्य उपरि प्रहारं कुर्वन् मुख्यमन्त्री न्यवेदयत् यत् हिमाचलस्य हितानां रक्षणाय काङ्ग्रेस-सर्वकारेण दृढः सङ्ग्रामः कृतः, अतः अस्य श्रेयः अपि प्रदेशस्य जनपदाय काङ्ग्रेस-सर्वकाराय च गच्छति।

सः अवदत् यत् भाजपा-नेतृभ्याम् अनुरागसिंहठाकुर-जयरामठाकुराभ्याम् उत्तराखण्ड-सर्वकारस्य पीडा ज्ञातव्या। तेन प्रोक्तं यत् मया उत्तराखण्डस्य मुख्यमन्त्रिणः चिन्ताः समीपात् दृष्टाः; हिमाचलस्य भाग्यम् आसीत् यत् अत्र काङ्ग्रेस-सर्वकारः वर्तते, अन्यथा उत्तराखण्डवत् हिमाचलस्य उपरि अपि दारुणः वित्तीय-भारः आपतिष्यत्। किशाऊ-परियोजनायाः अन्तर्गतं विना कञ्चिदपि अतिरिक्त-व्ययं हिमाचलेन प्रायः सार्धैक-सहस्र-कोटि-रूप्यकाणां (१५०० कोटि) लाभः प्राप्यते, यत्रैव समानाय आय-सङ्ग्रहाय उत्तराखण्डाय प्रायः त्रिसहस्र-कोटि-रूप्यकाणि (३००० कोटि) व्ययीकर्तव्यानि भविष्यन्ति।

## सर्वकारस्य विधिक-विजयः राजस्व-वृद्धिश्च

मुख्यमन्त्रिणा उल्लिखितं यत् गतेभ्यः त्रयोविंशति-वर्षेभ्यः (२३) न्यायालये विचारणाधीनं 'वाइल्ड-फ़्लावर-हॉल' (Wildflower Hall) सम्बद्धं प्रकरणं राज्य-सर्वकारेण सर्वोच्चन्यायालये जितम्। अनेन प्रदेश-कोषे ४०१ कोटि-रूप्यकाणि समागतानि, प्रति-मासं च प्रायः कोटि-द्वय-रूप्यकाणाम् (२ कोटि) अतिरिक्तम् आयं भवति।

# सर्वकारीय-सी.बी.एस.ई. विद्यालयेषु ३० सितम्बरपर्यन्तं सेवां कुर्वतां शिक्षकाणां योग्यतानुसारं नियुक्तिं कुर्यात् सर्वकारः, उच्चन्यायालयस्य आदेशः



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य उच्चन्यायालयेन राज्यस्य सी.बी.एस.ई. सम्बद्धेषु 'स्कूल ऑफ एक्सीलेंस' विद्यालयेषु शिक्षकाणां प्रधानाचार्याणां च चयन-नियुक्ति-प्रक्रियां नियमानुसारं वरीयता- आधारेण च ३० सितम्बरपर्यन्तं सम्पन्नं कर्तुं आदेशः प्रदत्तः। न्यायाधीशयोः अजयमोहनगोयल तथा योगेश जायसवाल इत्येतयोः खण्डपीठेन राज्यसर्वकाराय ५ अक्तूबरपर्यन्तं उच्चन्यायालयस्य आदेशानां अनुपालनप्रतिवेदनं समर्पयितुं निर्देशः प्रदत्तः। न्यायालयेन अयम् आदेशः सर्वकारस्य पक्षतः प्रदत्तस्य आश्वासनस्य अनन्तरं पारितः। महाधिवक्ता अनूप रतनः न्यायालयम् अवगतं कारितवान् यत् १४ अगस्तदिनाङ्कितस्य न्यायालयीयादेशस्य अनुसारम् आवश्यकाः विभागीयाः कार्यविधयः प्रचलन्ति।प्रकरणस्य गाम्भीर्यं दृष्ट्वा न्यायालयेन उक्तं यत् विज्ञापनस्य ५.५ अनुच्छेदस्य अन्तर्गतं अधिसूचितानां रिक्तस्थानानां कृते नियुक्ति-प्रक्रिया सर्वथा ३० सितम्बरपर्यन्तं पूर्णा करणीया। न्यायालयस्य अस्मिन् कठोरनिर्देशे सति अभ्यर्थिनां दीर्घकालतः लम्बितायाः नियुक्ति-प्रक्रियायाः पूर्णतायाः आशा उत्पन्ना अस्ति।खण्डपीठेन अयम् आदेशः वीरेन्द्रसिंहस्य अन्येषां च पक्षतः प्रस्तुतायां याचिकायां प्रदत्तः। श्रवणकाले उच्चन्यायालयेन निर्देशः प्रदत्तः यत् ये केचन पात्राः शिक्षकाः अथवा प्रधानाचार्याः चयनप्रक्रियायां अन्तर्भवन्ति, येषां नियुक्तिः अद्यापि न कृता अस्ति, ते शीघ्रातिशीघ्रं एतेषु विद्यालयेषु नियुक्ताः करणीयाः।

# सी.बी.एस.ई. सम्बद्धेषु सर्वकारीय-विद्यालयेषु शिक्षकाणां परामर्शप्रक्रिया २४ सितम्बरदिनांके



**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशस्य विद्यालयीय- शिक्षानिदेशालयेन सी.बी.एस.ई. सम्बद्धेषु सर्वकारीय-विद्यालयेषु विज्ञानसङ्कायस्य रिक्तपदानां पूर्तेः प्रक्रिया त्वरिता कृता। धर्मशाला-स्थितेन विद्यालयशिक्षा-मण्डलेन स्क्रीनिङ्ग-परीक्षायाः परिणामस्य घोषणानन्तरं योग्य- पात्राणाम् सेवारत-शिक्षकाणां नियुक्त्यर्थं परामर्शप्रक्रिया-कार्यक्रमः प्रकाशितः अस्ति। परामर्शप्रक्रिया-कार्यक्रमः २४ सितम्बरदिनांके विद्यालयीयशिक्षा- निदेशालये, शिमला इत्यत्र भविष्यति। विद्यालयीयशिक्षा-निदेशालयेन प्रकाशितस्य कार्यक्रमस्य अनुसारं परामर्श-प्रक्रियायां भौतिकी, रसायनशास्त्र, जीवविज्ञानम् इत्येतेषु विषयेषु योग्याः शिक्षकाः आहूताः सन्ति। विषयानुसारं परामर्शप्रक्रिया-कार्यक्रमः पृथक्-पृथक् समये भविष्यति। भौतिकीविषयस्य शिक्षकाणां परामर्शप्रक्रिया-कार्यक्रमः प्रातः ९:०० वादनात्, रसायनशास्त्रस्य मध्याह्ने १२:३० वादनात्, जीवविज्ञानस्य परामर्शप्रक्रिया-कार्यक्रमः अपराह्ने २:०० वादनात् आरप्स्यते। परामर्शप्रक्रियाकार्यक्रमः निदेशालयस्य सम्मेलनकक्षे आयोजयिष्यते। क्रमवीक्षणपरीक्षायां पात्राणां घोषितानां शिक्षकाणां योग्यताक्रमानुसारिणी सूची शिक्षा-विभागस्य आधिकारिक- जालपुटे उपलब्धा कारिता अस्ति। परामर्शप्रक्रिया-कार्यक्रमकाले योग्यताक्रमस्य तथा उपलब्धानां रिक्तपदानां आधारेण शिक्षकाणां सी.बी.एस.ई. सम्बद्धेषु सर्वकारीय-विद्यालयेषु सेवायै नियुक्तिः प्रदास्यते। अनेन तेषु सर्वकारीय-विद्यालयेषु विज्ञानविषयस्य शिक्षकाणां न्यूनता दूरीकर्तुं साहाय्यं भविष्यति, यत्र भौतिकविज्ञानस्य, रसायनशास्त्रस्य अथवा जीवविज्ञानस्य शिक्षकाः उपलब्धाः न सन्ति। परामर्श-प्रक्रियायां सम्मिलिताः शिक्षकाः विभागेन निर्धारितं परामर्शप्रपत्रं पूरयित्वा आनेतव्यं भविष्यति। तेन सह सर्वेषां आवश्यक-प्रपत्राणां मूलप्रतयः अपि प्रस्तुतव्याः भविष्यन्ति। परामर्शप्रक्रियाकाले सम्बन्धितस्य शिक्षकस्य स्वयं उपस्थितिः अनिवार्या कृता अस्ति। निर्धारितसमये काउन्सलिङ्ग-स्थले उपस्थितिं न ददतः अभ्यर्थिनः अभ्यर्थिता निरस्ता कर्तुं शक्यते।

## अत्यधिक-शैत्येन द्व्यशीति-वर्षीयस्य (८२) वृद्ध-यात्रिकस्य निधनम्

मणिमहेश-डल-समीपे अत्यधिक-शैत्यस्य (कड़ाके की ठंड) कारणात् द्व्यशीति-वर्षीयस्य (८२) एकस्य वृद्ध-श्रद्धालोः दुःखदं निधनम् अभवत्। मृतस्य अभिज्ञानं जयराम-शर्मा (आत्मजः परसरामः), निवासी ग्रामः कलरबत्ता, मण्डलं किश्तवाड (जम्मू-कश्मीरम्) इति रूपेण जातम्। सः भद्रवाह-क्षेत्रात् कमलसिंह-वजीर-महोदयस्य यष्टि-दलेन सह यात्रायां सम्मलितः आसीत्। प्राप्त-विवरणानुसारं शुक्रवासरे मध्यरात्रौ डल-समीपे जयराम-शर्मणः स्वास्थ्यं सहसैव विकृतम्।



# डल-सरोवर-भेदन-परम्परानन्तरं सम्पन्नं 'शाही-स्नानम्'; तीव्रे हिमेऽपि न विचलिता भक्तानाम् आस्था

**हिमसंस्कृतवार्ता —चम्बा।** राधाष्टमी-महापर्वणि शुक्रवासरे मणिमहेश-डल-सरोवरे विशालस्य 'शाही-स्नानस्य' परम्परा विधिवत् निर्व्यूढा। मध्याह्ने १:०२ वादने शुभ-मुहूर्ते प्रारब्धे सति शतशः शिव-भक्ताः पवित्र-डल-सरोवरे आस्थायाः निमज्जनम् (डुबकी) अकुर्वन्। अस्मात् पूर्वं मध्याह्ने प्रायः द्वादश-वादने (१२:००) सरोवर-भेदनस्य (झील तोड़ने की) शताब्दयः पुरातनी परम्परा सम्पूर्णा जाता। शाही-स्नान-काले सम्पूर्णः डल-परिसरः "हर-हर महादेव" इति जयघोषैः प्रतिध्वनितः अभवत्। डल-सरोवरं परितः च समुन्नत-शिखरेषु सञ्जातेन तीव्रेण हिमपातेन शीत-तरङ्गैः च अपि भक्तानाम् उत्साहे कापि न्यूनता न दृष्टा। प्रचण्ड-शैत्यस्य मध्येऽपि यात्रिकाः पवित्र-सरोवरं सम्प्राप्य शुभ-मुहूर्ते स्नात्वा चतुर्मुख-शिवलिङ्गस्य विधिवत् पूजा-अर्चनां विहितवन्तः। तदनन्तरं बहवः यात्रिकाः पवित्र-डल-सरोवरस्य जलं स्वीकृत्य भरमौरं प्रति न्यवर्तन्त, केचन च रात्रौ सरोवराभ्याशे एव स्थातुं निश्चयं कृतवन्तः। एते भक्ताः शनिवासरे शुभ-मुहूर्ते पुनः स्नात्वा प्रत्यागमनं करिष्यन्ति। राधाष्टम्याः शाही-स्नानस्य शुभ-मुहूर्तः शनिवासरे अपराह्ने ३:२७ वादनं यावत् स्थास्यति। शुक्रवासरे प्रभातादेव मणिमहेशं प्रति गच्छतां यात्रां समाप्य च परावर्तमानानां यात्रिकाणां महान् सम्मर्दः दृष्टः। चरपटनाथस्य, दशनामी-अखाड़ादलस्य, सञ्चूई-ग्रामस्य च शिव-साधकानां (धर्म-यष्टीनां च) शनिवासरस्य सायङ्काले यावत् भरमौर-सम्प्राप्तेः सम्भावना अस्ति। विदितं स्यात् यत् गते वर्षे प्राकृतिक-आपदः कारणात् यात्रायाः स्थगनेन सहस्रशः भक्ताः स्नानात् वञ्चिताः अभवन्, अतः अस्मिन् वर्षे देशस्य विविध-भागेभ्यः भक्ताः विपुल-सङ्ख्यया समागताः।




# ऊना मण्डले भाषा-संस्कृति-विभागेन राजभाषा-हिन्दी-पक्षोत्सवस्य अवसरे मण्डलस्तरीय-प्रतिस्पर्धानाम् आयोजनम्

**हिमसंस्कृतवार्ताः- ऊना**
भाषा-संस्कृति-विभागः हिन्दीभाषायाः संरक्षणे संवर्धने च महत्त्वपूर्णां भूमिकां निर्वहति। भाषा-संस्कृति- विभागेन ऊना-मण्डलेन राजभाषा-हिन्दी- पक्षोत्सवस्य अवसरे लतामङ्गेशकर-कलाकेन्द्रे समूरकलांस्थाने मण्डलस्तरीय-प्रतिस्पर्धानाम् आयोजनं कृतम्। अस्मिन् अवसरे विद्यालयस्तरीयाणां भाषण- निबन्धलेखन- प्रश्नोत्तरी- प्रतिस्पर्धानाम् आयोजनम् अभवत्। एतासु मण्डलस्तरीय-प्रतिस्पर्धासु ऊना-मण्डलस्य विभिन्नेभ्यः विद्यालयेभ्यः प्रायः विंशत्यधिक-शतम् (१२०) छात्राः भागम् अगृह्णन्। भाषण-प्रतिस्पर्धायां प्रतिभागिभिः "जनभाषात्वेन राजभाषात्वेन च हिन्दीभाषायाः दशा दिशा च" इति विषये ओजस्वीनि भाषणानि दत्तानि। अस्यां स्पर्धायां 'आर्यन- मॉडल- विद्यालयः बङ्गाणा' इत्यस्य छात्रा खुशी प्रथमस्थानं, 'राजकीय- वरिष्ठ- माध्यमिक- विद्यालयः बङ्गाणा' इत्यस्य छात्रः पीयूष राणा द्वितीयस्थानं, 'राजकीय- वरिष्ठ- माध्यमिक- विद्यालयः दौलतपुर' इत्यस्य छात्रा दृष्टिः तृतीयस्थानं, 'राजकीय- वरिष्ठ- माध्यमिक- विद्यालयः सनाहल' इत्यस्य छात्रः प्रियांशुः, 'राजकीय- वरिष्ठ- माध्यमिक- विद्यालयः कलरूही' इत्यस्य छात्रा जसव्रीत ठाकुरः च चतुर्थस्थानं प्राप्तवन्तः।निबन्धलेखन-प्रतिस्पर्धायां छात्रैः "कृत्रिमबुद्धिमत्ता हिन्दीभाषायाः भविष्यं च" इति विषये सारगर्भिताः निबन्धाः लिखिताः। अस्यां स्पर्धायां 'आर्यन- मॉडल- विद्यालयः बङ्गाणा' इत्यस्य छात्रा राधिका प्रथमस्थानं, 'राजकीय- वरिष्ठ- माध्यमिक- विद्यालयः मरवाड़ी' इत्यस्य छात्रा सोनाली राणा द्वितीयस्थानं, 'राजकीय- वरिष्ठ- माध्यमिक- विद्यालयः समूरकलां' इत्यस्य छात्रा रिया तृतीयस्थानं, 'राजकीय- उच्च- विद्यालयः जनकौर' इत्यस्य छात्रा पायल सैनी, 'राजकीय- वरिष्ठ- माध्यमिक- विद्यालयः सरोह' इत्यस्य छात्रा निधिः च चतुर्थस्थानम् अलभन्त। प्रश्नोत्तरीप्रतिस्पर्धायां 'राजकीय- वरिष्ठ- माध्यमिक- विद्यालयः ठट्ठल' इत्यस्य छात्रा शगुन शर्मा प्रथमस्थानम् अलभत्। 'राजकीय- वरिष्ठ- माध्यमिक- विद्यालयः ऊना-२' इत्यस्य छात्रा हेमापुरी, 'राजकीय- वरिष्ठ- माध्यमिक- विद्यालयः कलरूही' इत्यस्य छात्रा मनुबाला, 'राजकीय- वरिष्ठ- माध्यमिक- विद्यालयः तलाई' इत्यस्य छात्रा पलक च द्वितीयस्थानं प्राप्तवत्यौ। 'राजकीय- वरिष्ठ- माध्यमिक- विद्यालयः चताड़ा' इत्यस्य छात्रा पलक धीमान, 'राजकीय- वरिष्ठ- माध्यमिक- विद्यालयः समूरकलां' इत्यस्य छात्रा दीक्षा शर्मा, 'राजकीय- वरिष्ठ- माध्यमिक- विद्यालयः दौलतपुर चौक' इत्यस्य छात्रा खुशी च तृतीयस्थानं, 'राजकीय- वरिष्ठ- माध्यमिक- विद्यालयः मुबारकपुर' इत्यस्य छात्रा पलक, 'आर्यन- मॉडल- विद्यालयः बङ्गाणा' इत्यस्य छात्रा अनुष्का राणा च चतुर्थस्थानं प्राप्तवत्यः।एतासु प्रतिस्पर्धासु 'प्रो. सिम्मी अग्निहोत्री राजकीय- महाविद्यालयतः डॉ. शाकुन्तलादेवी राणा, 'राजकीय- कन्या- महाविद्यालय ऊनातः डॉ. ओंकार सिंहः, 'राजकीय- महाविद्यालयः ऊनातः श्रेयसी, 'राजकीय- महाविद्यालयः धनेटातः डॉ. प्रीतम चन्दः, 'राजकीय- महाविद्यालयः हमीरपुरतः सेवानिवृत्तः डॉ. प्रकाशचन्दठाकुरः च निर्णायक- मण्डलस्य सदस्याः आसन्। एतदतिरिच्य ऊना- मण्डलस्य विभिन्नेभ्यः विद्यालयेभ्यः शिक्षकाः अपि कार्यक्रमे उपस्थिताः आसन्। कार्यक्रमस्य अन्ते मण्डल-भाषाधिकारिणा सर्वेभ्यः प्रतिभागिभ्यः शिक्षकेभ्यः च धन्यवादः ज्ञापितः। विजेतृप्रतिभागिभ्यः प्रमाणपत्राणि पुरस्काराः च प्रदत्ताः।



# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ताकार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। मिस्रदेशे पुरातत्त्वविद्भिः एकः प्राचीनः युद्धाश्वः पूर्णसम्मानेन निखातः प्राप्तः।
**काव्या-** नमस्ते नन्दिनि। आश्चर्यकरम् एतत्! अश्वाय अपि तादृशः सम्मानः दत्तः। अन्या वार्ता अपि श्रुता वा? एकेन नववर्षीयबालकेन स्वक्रीडायाः प्रसारार्थं कोटिमूल्यकानि रूप्यकाणि व्ययीकृतानि।
**नन्दिनी-** अहो! बालकेन महती धनहानिः कृता। पित्रा तत् दृष्ट्वा किं चिन्तितम्! किन्तु मया अन्या वार्ता पठिता। एका एकोनषष्टिवर्षीया महिला त्रिंशद्वर्षाणाम् अनन्तरम् उद्योगात् निष्कासिता। तया ततः अण्टार्कटिकामहाद्वीपं गत्वा भारोत्तोलकयानं चालितम्।
**काव्या-** अद्भुतम्! तया हिमं गत्वा नूतनं कार्यम् आरब्धम्। इदानीं कार्यालये जाताम् एकां विचित्रां वार्तां वदामि। एकेन कर्मकरेण अवकाशः याचितः। अधिकारिणा सन्देशे लिखितम्- "यत्र असि तत्रैव तिष्ठ" इति। एषः सन्देशः अन्तर्जाले सर्वैः दृष्टः, उपहासः च कृतः।
**नन्दिनी-** हह! कर्मकरेण भीतिः अनुभूता स्यात्। अद्य सर्वाः वार्ताः अतीव विचित्राः दृष्टाः।

हिमसंस्कृतवार्ताः, ईदरधीरजः

# 'विद्या ददाति विनयं...' इत्यनेनैव संस्कारेण निष्पत्स्यते सशक्त-राष्ट्र-निर्माणम् :— शिक्षामन्त्री मिथिलेशकुमारतिवारी




## छात्रा विरचितवती शिक्षामन्त्रिणः मनोहारी प्रतिकृतिम्; एकादशानां संस्कृत-विद्यालयानां वटूनां सम्पन्नो महासमागमः; मण्डलस्येतिहासे प्रथमवारं सर्वेभ्यश्छात्रेभ्यः पदकं प्रशस्ति-पत्रञ्च प्रदत्तम्

**पाटलीपुत्रम्। हिमसंस्कृतवार्ताः राघव नाथ झा।** भारतस्य यशस्विनः प्रधानमन्त्रिणः नरेन्द्रमोदि-महोदयस्य षट्सप्ततितमस्य (७६) जन्मदिवसस्य पावनोपलक्ष्ये बिहार-संस्कृत-शिक्षा-बोर्ड-पक्षतः बिहार-सांस्कृतिक-विद्यापीठे, राजाबाजार, पाटलीपुत्रे 'आशीर्वादस्य दीपः' (आशीर्वाद का दीया) इत्याख्यस्य गरिमामयस्य महनीय-कार्यक्रमस्य भव्यम् आयोजनं सम्पन्नम्। अस्मिन् समारम्भे बिहार-सर्वकारस्य शिक्षामन्त्री माननीयः मिथिलेशकुमारतिवारी मुख्यतिथित्वेन समुपस्थितवान्। बिहार-संस्कृत-शिक्षा-बोर्ड-अध्यक्षेण मृत्युञ्जयझा-महोदयेन मिथिलायाः पावन-पारम्परिक-पाग-वस्त्रेण उत्तरीय-चादरेण च शिक्षामन्त्रिणः भावपूर्णम् अभिनन्दनं कृतम्। शिक्षामन्त्रिणा मण्डलाध्यक्षेण च संयुक्तरूपेण मङ्गल-दीप-प्रज्ज्वालनेन समारोहस्य विधिवत् समुद्घाटनं विहितम्। अस्मिन् अवसरे एकादशभ्यः प्रमुख-संस्कृत-विद्यालयेभ्यः समागताः छात्र-छात्राः, बटवः, आचार्याश्च संस्कृत-वाङ्मय-कला-पारम्परिक-सांस्कृतिक-विधाभिः संसिक्ताभिः विविध-प्रस्तुतिभिः स्वकीय-विलक्षण-प्रतिभायाः सम्मोहकं प्रदर्शनं कृतवन्तः।

'विद्या ददाति विनयं...' इति संस्मृत्य शिक्षामन्त्रिणा प्रतिपादितं भारतीय-संस्काराणां माहात्म्यम्
सभां सम्बोधयन् शिक्षामन्त्री मिथिलेशकुमारतिवारी सुप्रसिद्धं नीति-श्लोकम्—

"विद्या ददाति विनयं विनयाद् याति पात्रताम्।
पात्रत्वाद् धनमाप्नोति धनाद् धर्मं ततः सुखम्॥"

इत्येतत् सविस्तरं समुद्धृत्य प्रत्यपादयत् यत् विद्यायाः यथार्थं भूषणं शीलम्, आचरणम्, विनयश्च वर्तते। शिक्षा मानवं केवलं ज्ञान-सम्पन्नमेव न करोति, अपि तु तस्मिन् उच्च-संस्कारान्, अनुशासनं, विनयशीलताञ्च सम्पादयति। तेनोक्तं यद् विनय एव नरं पात्रतां प्रति नयति, तथा च संस्कार-सम्पन्नाः छात्रा एव भविष्ये समेत्य समुन्नतस्य, समृद्धस्य, सशक्तस्य च राष्ट्रस्य निर्माणं कुर्वन्ति। तेन साटोपमुद्घोषितं यत् संस्कृतं न केवलं काचित् प्राचीन-भाषा, प्रत्युत भारतीय-ज्ञान-परम्परायाः, संस्कृतेः, संस्काराणाञ्च मूलाधारभूता अजस्रा सरणी वर्तते। गीर्वाणवाण्याः देवभाषायाः संस्कृतस्य रक्षणाय, संवर्धनाय, प्रचाराय च समाजेन साकं नूतन-पीढ्या मिलित्वा कटिबद्धतया कार्यं करणीयम्।

रसूलपुर-वास्तव्यया छात्रया सृष्टिकुमार्या विरचितं शिक्षामन्त्रिणः मनोहरं तैलचित्रम्
अस्मिन् कार्यक्रमे सारण-मण्डलस्थस्य महेन्द्रनाथ-संस्कृत-प्राथमिक-सह-माध्यमिक-विद्यालयस्य (रसूलपुर) छात्रया सृष्टिकुमार्या स्वहस्तेन विरचिता शिक्षामन्त्रिणः मिथिलेशकुमारतिवारिणः अतीव सुन्दरी प्रतिकृतिः (तैलचित्रम्) मञ्चोपरि तस्मै सादरं समर्पिता। छात्रायाः एतादृशं सूक्ष्म-कला-नैपुण्यम् अवलोक्य शिक्षामन्त्री विमुग्धः सन् तां भृशं प्राशंसत्, तस्यै च शुभाशीर्वादं वितीर्य उज्ज्वल-भविष्याय मङ्गलाशाः समार्पयत्। समारोहे छात्र-छात्राभिः प्रधानमन्त्रिणः नरेन्द्रमोदिनः आकर्षक-चित्राणि तथा च भारतमातुः मनोहारिणी रङ्गावली (रङ्गोली) अपि रचिता। संस्कृत-विद्यालयानां विद्यार्थिनां कलात्मक्या सर्जनात्मक्या च प्रतिभया समुपस्थितानां विदुषां मनांसि समभिरञ्जितानि।

मण्डलस्येतिहासे प्रथमवारं सर्वेषां छात्राणां पदक-प्रशस्ति-पत्रैः समादरः
बिहार-संस्कृत-शिक्षा-बोर्ड-संस्थायाः सुदीर्घे इतिहासे प्रथमवारं कार्यक्रमे भागं गृहीतवद्भ्यः सर्वेभ्य एव छात्र-छात्रेभ्यः पदकं (मेडल) प्रशस्ति-पत्रञ्च प्रदाय तेषां गरिमामयः सत्कारः विहितः। बोर्ड-अध्यक्षस्य मृत्युञ्जयझा-महोदयस्य अनुपम-प्रेरणया सञ्जातेनानेन ऐतिहासिक-सामूहिक-सम्मानेन विद्यार्थिषु तेषां गुरुजनेषु च महती मुदा, अपरिमितः उत्साहश्च प्रादुरभवत्।

बोर्ड-अध्यक्षः मृत्युञ्जयझा प्रत्यपादयत् यद् ग्रामीणेभ्यः दूरस्थेभ्यश्च क्षेत्रेभ्यः समुपस्थितेषु संस्कृत-विद्यालयानां बालकेषु प्रतिभायाः किमपि न्यूनत्वं नास्ति। केवलं तेभ्यः समुचितस्य मञ्चस्य, निरन्तर-प्रोत्साहनस्य, मार्गदर्शनस्य चावश्यकता वर्तते। तेन दृढीकृतं यत् संस्कृत-जिज्ञासूनां मेधाविनां छात्राणां प्रतिभायाः उन्मीलनाय, तेषां समादराय च अयमुपक्रमः भविष्येऽपि अविरततया प्रवर्तिष्यते।

कर्मचारिणां निष्काम-श्रमेण साकारं जातं दिव्यम् आयोजनम्
'आशीर्वादस्य दीपः' इति महनीय-समारोहस्य साफल्ये बिहार-संस्कृत-शिक्षा-बोर्ड-संस्थायाः कर्मचारिणां सहयोगीनाञ्च श्रम-निष्ठा परमा श्लाघनीया आसीत्। पूर्वसज्जतातः आरभ्य विद्यालयेभ्यः विद्यार्थिनां समन्वय-साधनं, सुसज्जित-मञ्च-व्यवस्थापनं, सम्मान-समारोहस्य सुव्यवस्था, इतराणि च प्रबन्ध-कार्याणि कर्मचारिभिः अहर्निशं कृतेन घोर-परिश्रमेण सफलीकृतानि।

बोर्ड-संस्थायाः विनेशकुमारसिंहः, आलोकराजः, रूपेशकुमारः, रामबलीरामः, सुशीलकुमारवर्मा, जितेन्द्रकुमारसिंहश्च कार्यक्रमस्य योजनासु, सम्पादन-क्रियासु, सुसञ्चालने च विशिष्टं साहचर्यम् अददुः। तेषां सतत-परिश्रमेण समन्वयेन च समग्रोऽपि कार्यक्रमः निर्विघ्नतया सुव्यवस्थिततया च सम्पन्नः अभवत्। कर्मचारिणां कर्तव्यनिष्ठाम् अवलोक्य उपस्थिताः समग्राः गण्याः मान्याश्च तान् साधुवादेन अभिनन्दितवन्तः।

एकादशानां प्रमुख-संस्कृत-विद्यालयानां विद्यार्थिनः शिक्षकाश्च समभिव्याप्ताः
अस्मिन् महति समागमे बिहार-राज्यस्य एकादशभ्यः लब्धप्रतिष्ठेभ्यः संस्कृत-विद्यालयेभ्यः छात्र-छात्राः प्राचार्याः शिक्षकाश्च महता उत्साहेन समुपस्थिताः आसन्। तेषु—

- ईश्वरीदत्त-संस्कृत-प्राथमिक-सह-माध्यमिक-विद्यालयः, भगवानपुरम्, वैशाली
- रामावतार-संस्कृत-उच्च-विद्यालयः, हराजी, सारणम्
- महेन्द्रनाथ-संस्कृत-प्राथमिक-सह-माध्यमिक-विद्यालयः, रसूलपुरम्, सारणम्
- रामनाथ-बालिका-संस्कृत-उच्च-विद्यालयः, कैमाशिकोह, पाटलीपुत्र-नगरम् (पटना सिटी)
- श्रीगणेश-आदर्श-संस्कृत-उच्च-विद्यालयः, बख्तियारपुरम्, पाटलीपुत्रम्
- स्वामिसहजानन्द-संस्कृत-उच्च-विद्यालयः, सीतारामाश्रमः, बिहटा
- स्वामिवासुदेवाचार्य-संस्कृत-उच्च-विद्यालयः, तरेतपाली, पाटलीपुत्रम्
- सिद्धेश्वर-संस्कृत-उच्च-विद्यालयः, पचरुखिया, भोजपुरम्
- राजेन्द्र-संस्कृत-उच्च-विद्यालयः, मानपुरम्, गया
- यशोमति-संस्कृत-प्राथमिक-सह-उच्च-विद्यालयः, बेलावारिस, गोह, औरङ्गाबादम्
- रामस्वरूप-रामलहर-त्रिपाठी-संस्कृत-उच्च विद्यालयः, कायमनगरम्, भोजपुरम्

# कुमारभास्करवर्म- संस्कृत- पुरातनाध्ययन- विश्वविद्यालये लैङ्गिकविषयेषु संवेदनशीलता- जागरूकतासभा





**हिमसंस्कृतवार्ता:- डॉ. निशिकान्तपाण्डेयः**

कुमारभास्करवर्म- संस्कृत- पुरातनाध्ययन- विश्वविद्यालये १७ सितम्बरः, गुरुवासरे, आन्तरिक- आक्षेप- समितेः उपक्रमेण 'लैङ्गिकविषयेषु संवेदनशीलता, जागरुकता' इति विषयमधिकृत्य एका जागरूकतासभा समायोजिता।

विश्वविद्यालयस्य सभाकक्षे आयोजितेयं सभा दीपप्रज्वलनेन वेदमन्त्रपाठेन च प्रारब्धा। अस्मिन् कार्यक्रमे विश्वविद्यालयस्य कुलपतिः आचार्यः प्रह्लाद रा. जोशी, आश्रय-स्वयंसेवी-संस्थायाः, नलबारी इत्यस्याः अध्यक्षा रिङ्कु बरुवा महन्तः, आमन्त्रितातिथिरूपेण ग्राम्यविकासमञ्चस्य अध्यक्षः पृथ्वीराज डेका, विश्वविद्यालयस्य सहकुलपतिः प्रो. मल्लिका कलिता, कुलसचिवः डॉ. मनोजकुमार शर्मा, आन्तरिक-आक्षेप-समितेः अध्यक्षा प्रो. उमामहेश्वरी बगलु इत्येते उपस्थिताः आसन्।

तदतिरिक्तं समितेः सक्रियसदस्या डॉ. पापरी बरुवा इत्यादयः सर्वे सदस्याः, विश्वविद्यालयस्य प्राध्यापकाः प्राध्यापिकाश्च, शोधच्छात्राः, अशैक्षणिक- कर्मचारिणः, छात्राः छात्र्यश्च तथा क्षेत्रस्य स्थानीयाः जनाः सभायाम् उत्साहपूर्वकं सहभागं कृतवन्तः। सभायां स्वागतभाषणं कुर्वन् विश्वविद्यालयस्य कुलपतिः आचार्यः प्रह्लाद रा. जोशी शैक्षणिकसंस्थासु आन्तरिक-आक्षेप-समितेः गठनसम्बद्धानां ICC-नीतिनिर्देशानां विषये प्रकाशं पातितवान्। शैक्षणिकसंस्थासु सुरक्षितम्, सम्मानजनकं, समानतामूलकं वातावरणं निर्मातुं तादृशीनां समितीनां महत्त्वमपि सः विशेषतया प्रतिपादितवान्। सभायाः मुख्यवक्त्री आश्रय-स्वयंसेवी-संस्थायाः, नलबारी इत्यस्याः अध्यक्षा रिङ्कु बरुवा महन्तः स्वजीवने पुरुषाणां महिलानां च समानरूपेण स्वावलम्बित्वस्य महत्त्वं प्रतिपादितवती। सा आन्तरिक- आक्षेप-समितिसम्बद्धानां विधीनां, तेषां सम्यगुपयोगस्य च विषये विस्तरेण विवेचनं कृतवती। कार्यक्रमे आमन्त्रितातिथिः ग्राम्यविकासमञ्चस्य अध्यक्षः पृथ्वीराज डेका प्राचीनमूल्यानाम् आधुनिकचिन्तनस्य च मध्ये समन्वयं स्थापयित्वा संस्कारस्य, नैतिकतायाः तथा मूल्यशिक्षायाः माध्यमेन प्राचीनस्य आधुनिकस्य च मध्ये सुदृढं सेतुनिर्माणं कर्तुं शक्यते इति प्रतिपादितवान्। समाजे लैङ्गिकवैषम्यस्य निवारणाय सः विविधान् उपयोगिनः परामर्शान् अपि प्रदत्तवान्। विश्वविद्यालयस्य धर्मशास्त्रविभागस्य विभागाध्यक्षा डॉ. मैत्रेयी गोस्वामी कार्यक्रमस्य सञ्चालनं कृतवती। अन्ते सा उपस्थितेभ्यः सर्वेभ्यः कृतज्ञतां धन्यवादं च ज्ञापितवती। अन्तिमे शान्तिमन्त्रपाठेन अस्याः जागरूकतासभायाः समापनं जातम्

# भागलपुरे १३७ सहायक- आरक्षिणः उपनिरीक्षकपदे प्रोन्नताः अभवन्



**भागलपुरम्, १८ सितम्बर २०२६।**
**हिमसंस्कृतवार्ताः डॉ विमलेश झा**

भागलपुरस्य पुलिसकेन्द्रे गुरुवासरे १३७ सहायक- आरक्षिणां (ASI) उपनिरीक्षकपदे (SI) प्रोन्नतिः अभवत्। नवप्रोन्नतानाम् उपनिरीक्षकाणां सम्मानार्थं पुलिसकेन्द्रे पदचिह्नधारण-शसमारोहः आयोजितः। अस्मिन् अवसरे वरिष्ठ आरक्षीअधीक्षकः (SSP) श्रीप्रमोद यादवः नवप्रोन्नतानाम् अधिकारिणां स्कन्धेषु पदचिह्नानि स्थापयित्वा तान् अभिनन्दितवान् तथा च नूतनदायित्वनिर्वहणाय शुभकामनाः प्रदत्तवान्।

समारोहे वरिष्ठआरक्षीअधीक्षकः श्रीप्रमोद यादवः अवदत् यत् प्रोन्नतिः केवलं स्कन्धयोः नूतनपदचिह्नधारणपर्यन्तं सीमिता नास्ति, अपितु तया सह अधिकारिणां दायित्वानि अपि वर्धन्ते। तेन नवप्रोन्नतानाम् उपनिरीक्षकाणां नूतनभूमिकायाः दायित्वानां च विषये आवश्यकं मार्गदर्शनं प्रदत्तम्। अधीक्षक महोदयेन उक्तं यत् जनपदे १३७ नूतनानाम् उपनिरीक्षकाणाम् उपलब्धतया पुलिसव्यवस्था अधिकं सुदृढा भविष्यति। विशेषतः प्रकरणानाम् अन्वेषणे अस्य प्रत्यक्षः लाभः भविष्यति। अन्वेषणसम्बद्धेषु कार्येषु अधिकारिणां उपलब्धता वर्धिष्यते, येन प्रकरणानाम् अन्वेषणं शीघ्रतरं प्रभावी च भविष्यति।नूतनानाम् उपनिरीक्षकाणां नियुक्त्या विधिव्यवस्था, गश्तीव्यवस्था तथा पुलिससेवा अपि अधिकं प्रभावपूर्णा भविष्यति। तेन उक्तं यत् नूतनानाम् अधिकारिणां उपलब्धतया व्यवस्था अधिकं प्रभाविता कर्तुं शक्यते। सहैव डायल-११२ सेवायाः कार्यप्रणाली अपि अधिकं सक्रियाः प्रभावपूर्णा च कर्तुं सहायता भविष्यति।

नवप्रोन्नतेभ्यः अधिकारिभ्यः विशिष्टव्यक्तिसुरक्षा- कर्तव्यं , प्रकरणानाम् अन्वेषणं, विधिव्यवस्थां, परिभ्रमणव्यवस्थां तथा अन्यानि आरक्षक- प्राथमिकताकार्याणि प्रति आवश्यकाः निर्देशाः प्रदत्ताः। प्रोन्नत्या सह तेषां कार्यक्षेत्रम् अपि विस्तृतम् अभवत्। अधुना एते अधिकारिणः आरक्षकसेवायाः अनेकानि महत्त्वपूर्णानि दायित्वानि निर्वक्ष्यन्ति।

वरिष्ठ आरक्षी अधीक्षक श्रीप्रमोद यादवः नवप्रोन्नतानाम् अधिकारिणां परिवारजनानां च कृते अपि अस्य अवसरस्य विशेषमहत्त्वं प्रतिपादितवान्। तेन उक्तं यत् सर्वे अधिकारिणः स्वनूतनदायित्वं पूर्णनिष्ठया, तत्परतया, कर्तव्यभावनया च निर्वहिष्यन्ति।

# चित्रपटे समुत्कीर्णः पाटलिपुत्रस्येतिहासः; ‘पटना- कलम’ चित्रकलायाः १२९ चित्राणि जातानि आकर्षणकेन्द्रम्



## षष्ट्यधिकेभ्यः (६०+) कलाकारेभ्यः रचिताः कृतयः प्रदर्शिन्यां समभिव्याप्ताः; शाश्वत- प्रशिक्षण- केन्द्रस्य, ‘रेसिडेन्सी-कार्यक्रमस्य’ आरम्भाय प्रक्रमः

हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलिपुत्रम्
पाटलिपुत्रस्य ऐतिहासिक्याः चित्रकला-परम्परायाः ‘पटना-कलम’ इत्याख्यायाः रक्षणार्थं, नूतनपीढ्या च सह दृढ-सम्बन्ध-स्थापनार्थम् एका महती श्लाघनीया च पहलः सञ्जाता। ‘इण्टैक’ पाटलिपुत्र-शाखायाः पक्षतः ‘बिहार- ललित- कला- अकादमी’ परिसरे समायोजितायाः त्रिदिवसीयायाः ‘पटनाकलम’ चित्रकलाप्रदर्शिन्याः मङ्गल-दीप-प्रज्ज्वालनेन विधिवत् शुभारम्भः जातः। अस्यां प्रदर्शिन्यां षष्ट्यधिकेभ्यः कलाकारेभ्यः निर्मितानि एकोनत्रिंशदधिक-शतम् (१२९) चित्राणि प्रदर्शितानि सन्ति। एषा चित्र-प्रदर्शनी आगामिनि २० सितम्बर-दिनाङ्कं यावत् कला-रसिकेभ्यः उद्घाटिता स्थास्यति।
अस्मिन् कार्यक्रमे ‘किलकारी’ संस्थायाः निदेशिका ज्योतिपरिहार, बिहार- ललित- कला- अकादमी- संस्थायाः सचिवा अमृता प्रीतम, पटना- कला- महाविद्यालयस्य प्राचार्या डा. राखी कुमारी, ‘चेतनासमिति’ संस्थायाः अध्यक्षः विवेकानन्दझा, लब्धप्रतिष्ठः कलासङ्ग्रहकर्ता प्रदीप जैनः, ‘प्लानेट पटना’ इत्यस्य संस्थापकः आदित्य जालान, सङ्ग्रहालय- बिहारस्य पूर्व-निदेशकः डॉ. उमेशचन्द्र द्विवेदी च समभिव्याप्य कला-संस्कृति-जगतः बहवः मूर्धन्याः विद्वांसः समुपस्थिताः आसन्।
एकादशाधिकाः (११+) प्रशिक्षणकार्यक्रमाः कार्यशालाश्च सम्पन्नाः। ‘इण्टैक’ पाटलिपुत्रशाखायाः संयोजकेन भैरवलाल दासेन संसूचितं यद् अस्यां प्रदर्शिन्यां १२९ कृतयः समन्विताः सन्ति। अस्याः चित्र-समीक्षकौ (क्यूरेटर) वरिष्ठौ कलाकारौ प्रो. जितेन्द्र मोहनः प्रो. दिनेशकुमारश्च स्तः।
‘इण्टैक’ बिहारशाखायाः सहसंयोजकः शिवकुमारमिश्रः प्रत्यपादयत् यत् ‘पटना-कलम’ परम्परायाः चिरन्तन-संरक्षणाय इण्टैक-पक्षतः साम्प्रतं यावत् एकादशाधिकाः प्रशिक्षणकार्यक्रमाः कार्यशालाश्च आयोजिताः। संस्थया ‘पटना-कलम’ शैलीं प्रति कलामर्मज्ञानां कला-प्रेमिणाञ्च ध्यानम् आकृष्टुं सङ्गोष्ठीनां, वृत्तचित्रनिर्माणस्य (डॉक्युमेण्ट्री), ग्रन्थ-प्रकाशनस्य च श्लाघनीयाः उपायाः विहिताः। तेनोक्तं यद् एतस्मिन्नेव क्रमे वर्तमाना प्रदर्शनी आयोजिता वर्तते। आगामिषु दिवसेषु ‘पटना-कलम’ चित्रकलायाः शिक्षणाय एका शाश्वतव्यवस्था, ‘रेसिडेन्सी कार्यक्रमः’ आरब्धुं गम्भीरतया विचार्यते।

### ‘किलकारी’, ‘पटना प्लानेट’ चेत्यनयोः प्रशिक्षणस्य सङ्कल्पः

‘किलकारी’ संस्थायाः निदेशिका ज्योति परिहार न्यगादीत् यत् ‘किलकारी’ संस्थायां ‘पटना-कलम’ चित्रकलायाः प्रशिक्षणार्थं शाश्वतकेन्द्रस्य स्थापना-सम्भावनासु विमर्शनं क्रियते। तत्रैव ‘प्लानेट् पटना’ इत्यस्य संस्थापकः आदित्य जालान अवदत् यत् इण्टैक, पटना-प्लानेट इत्येतयोः संयुक्ताश्रयेण ‘पटना-कलम’ प्रशिक्षणस्य स्थायिप्रबन्धः शीघ्रमेव आरप्स्यते। ‘चेतना-समिति’ संस्थायाः अध्यक्षः विवेकानन्दझा अवोचत् यत् पाटलिपुत्रस्य इतिहासस्य सांस्कृतिक- प्रतिष्ठायाश्च चर्चा ‘पटना-कलम’ कलां विना सर्वथा अपूर्णा एव तिष्ठति। तेन राजेन्द्रनगरे एतदर्थम् एका शाश्वती व्यवस्था संवर्धनीया इति प्रतिपादितम्।

### कलाकाराणां कला-प्रेमिणाञ्च गरिमामयी उपस्थितिः

कार्यक्रमे बापू-स्तम्भस्य (बापू टॉवर) उपनिदेशकः ललितकुमारसिंहः, वरिष्ठ-रङ्गकर्मी प्रेमलतामिश्रः, मञ्जु झा, दिलीप वर्मा, राजेश सहायः, सोनाली कुमारी, डॉ. बी. के. कर्णः, डॉ. प्रिया, निभालभः, सविता कुमारी, प्रीति कुमारी, नूरजहाँ, अञ्जली नयनम्, पुष्यमित्रः, सीटू तिवारी, मनोज अम्बष्ठः, भारतभूषण झा, ऋषिका, सङ्गीता कुमारी, कल्पना मिश्रा, सुमित सौरभः, अमृता शाम्भवी, अन्नू कुमारी, अर्चना चौधरी, रचना प्रियदर्शिनी च समेत्य विपुलायां सङ्ख्यायां चित्रकाराः, कला-रक्षकाः, कला- सङ्ग्रहकर्तारः, पत्रकाराश्च समुपस्थिताः आसन्। एषा मनसस्तोषिणी चित्रप्रदर्शनी आगामिनि २० सितम्बरदिनाङ्कं यावत् बिहार- ललित- कला- अकादमीभवने निरन्तरं सम्प्रवर्तिष्यते।



## "संस्कृत कथा मञ्जरी" {२०}

## ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।

**"अथ काश्मीरलिङ्गदानं नाम चतुर्दशोपाख्यानम्" (१)**
पुनरपि राजा यदा सिंहासने समुवेष्टुं गच्छति तदाऽन्या पुत्तलिका तं निवार्य्याब्रवीत्- एकदा विक्रमादित्यो राजा पृथ्वीतले कस्मिन् स्थाने किमाश्चर्य्यं, के च सन्तः, किं तीर्थं, का वा देवताऽस्ति? इत्यादिकं विलोकयन् स्वयं योगिवेशेन परिभ्रमन् नगरमेकमगमत्। तन्नगरसमीपे तपोवनमेकम् अस्ति। तस्मिंस्तपोवने जगदम्बिकायां महान् प्रासादः आसीत्। तत्समीपे च काचित् नदी वहति। राजा नद्यां स्नात्वा देवतां नमस्कृत्य च तत्र देवालये उपविष्टो यावत् पश्यति तावत् अवधूतसारो नाम कश्चित् योगी तत्र समागतः, "सुखी त्वम्" इत्युक्त्वा तेन सह तत्र देवालये उपविष्टः योगिनोक्तं- कुतः समागतो भवान्? राज्ञोक्तं- मार्गस्थोऽहं कोऽपि तीर्थयात्रिकः। योगिनोक्तं- त्वं विक्रमादित्यो राजा ननु, मया एकदा उज्जयिन्यां दृष्टोऽसि, अतोऽहं जानामि; किमर्थं आगतोऽसि? राजाऽब्रवीत्- भो योगिराज! मम मनसि एवम् इच्छा वर्त्तते यत्- पृथ्वीपर्य्यटनेन किमप्याश्चर्य्यं विलोकनीयमिति, तथा च सतां सन्दर्शनमपि भविष्यति। अवधूतसारोऽब्रवीत्- भो राजन्! त्वं तादृशः विचक्षणोऽपि प्रमत्तः इव देशान्तरम् आगतोऽसि। राज्यामध्ये कश्चित् विप्लवः चेद्भविष्यति तदा किं करिष्यसि? राज्ञोक्तम्- अहं सर्वमपि राज्यभारं मन्त्रिहस्ते निधाय समागतः। योगिनोक्तं- राजन्! तथाऽपि त्वया नीतिशास्त्रविरोधः कृतः यतः-

**"कृषिर्विद्या वणिक् भार्य्या स्वधनं राज्यसम्पदः।**
**सुदृढश्चैव कर्तव्यं कृष्णसर्पमुखं यथा।।"**

तच्छ्रुत्वा राजा भणति- योगिन्! सर्वमितदनर्थकम् अत्र दैवबलामेव बलवत्। सुदृढीकृते सर्वसामग्रीसहितेऽपि राज्ये पौरुषयुक्तोऽपि पुरुषो दैववैमुख्यात् पराभवं प्राप्नोति। किं न श्रुता भवता राजशेखरनृपतेः गाथा इयम् अपूर्वविश्वासमूला?
योगिनोक्तं- कथमेतत्? राजाऽब्रवीत्- अस्ति उत्तरदेशे नदीपर्वतवर्डनं नाम नगरम्। तत्र राजशेखरो नाम राजा राज्यभारं वहति स्म। स देवद्विजपरायणोऽतीव धार्मिकः आसीत्।एकदा तस्य दायादाः सर्वे समागत्य तेन सह विगृह्य बलात् राज्यं गृहीत्वा, सपत्नीकं तं नगरात् निरासिषुः ततः स राजा पत्न्या पुत्रेण च सह नानादेशं पर्य्यटन्,कस्यचिन्नगरस्य समीपस्थे उपवनं गतः। तदा सूर्य्योऽप्यस्तं गतः। स पत्न्या पुत्रेण च समन्वितः कस्मिंश्चित् वटवृक्षमूले गत्वोपविष्टः। तस्मिंश्च वृक्षे पञ्च यक्षाः आसन्। ते परस्परं आलपन्ति स्म। तत्र एकेनोक्तम्- अस्मिन् नगरे राजा मृतः, तस्य च सन्ततिर्नास्ति; को वा राजा भविष्यति? द्वितोयेनोक्तं तत्र का चिन्ता? अत्र वटवृक्षमूले यो राजा तिष्ठति, तमेव अस्मिन् राज्ये अभिषेचय।
अन्यैरुक्तं- तथाऽस्तु। सपरिवारो राजाऽपि यक्षाणां तदवाक्यान्यश्रृणोत्। क्रमशः अग्रिमे पृष्ठे...

ततः सूर्योदयो जातः। सर्वे जनाः स्वस्वकर्माणि कर्तुं प्रवृत्ताः राजाऽपि सन्ध्यादिकं विधाय यावद्राज-मार्गाभिमुखं निर्गतः, तावत्त-द्राज्यराजनिर्वाचन निमित्तं मन्त्रि-भिर्मुक्ता धृतमाला काचित् करिणी राजानं विलोक्य, तस्य कण्ठे मालां निधाय तं स्वपृष्ठमारोप्य राजभवनं निनाय। ततः सर्वैमन्त्रिभिर्मिलित्वा अभिषेकं विधाय राजशेखरो राजा राज्ये स्थापितः।एकदा सर्वे प्रतिस्पर्धिनः नृपाः राजशेखरस्य भूयो राज्यप्राप्तिमाकर्ण्य सन्धिबद्धाः तद्राज्यात् तमुन्मूलयितुं तन्नगरम-वरुद्धवन्तः तस्मिंश्च राजनि स्वदेव्या सह पाशकक्रीडां कुर्वति चारमुखात् सहसा तद्वृत्तान्तमाकर्ण्य स्वामिनं तत्र सम्यक् उदासीनमालोक्य देव्या सविस्मयं भणितं- भो नाथ! भवता अधुनाऽपि कथं तूष्णीं स्थीयते? प्रत्यर्थिनृपैः तवैषा नगरी वेष्टिता, प्रभाते न केवलं नगरम्, अस्मानपि ते ग्रहीष्यन्ति राज्ञेक्तं- भो मुग्धे! किं प्रयत्नेन? यदा दैवमनुकूलं भवति, तदा सर्वं कार्यं स्वयमेव सम्पद्यते; यदा प्रतिकूलं दैवं, तदा सर्वं स्वयमेव नश्यति; त्वया नानुभूतं किं वृक्षौ यक्षे च दैवमेव परं कारणम्? वृक्षमूले स्थितस्य मे येन राज्यं दत्तं, तस्यैव चिन्ताऽपि अधुना नूनम आपतिता भवति।

**डा वर्षा प्रकाश टोणगांवकर**
**पुणे, महाराष्ट्रम्**



# कृषकाणां समृद्धये खाद्य-तैलक्षेत्रे चात्मनिर्भरतायै बिहारराज्ये तैल-तालस्य (ऑयल-पाम) कृषये लप्स्यते महत्तरं प्रोत्साहनम्

- **तैल-ताल-सस्यं कृषकेभ्यः प्रदास्यति सुदीर्घ-कालपर्यन्तम् उत्पादस्य स्थिरायाश्चाय-सम्पदः अवसरम्।**
- **कृषीवलानां समृद्ध्या सहैव राष्ट्रस्य खाद्य-तैलपूरणे बिहारराज्यं निर्वक्ष्यति महतीं भूमिकाम्- विजयकुमारसिन्हा**

हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलिपुत्रम्

बिहारसर्वकारस्य कृषिविभागेन राज्ये कृषीवलानाम् आर्थिकस्थितेः सुदृढीकरणार्थं, भारतवर्षस्य च खाद्यतैलक्षेत्रे स्वावलम्बन-सिद्धये "राष्ट्रिय- खाद्य-तैल- अभियानम्– तैल- तालः" इत्याख्यायाः योजनायाः राज्ये व्यापक-विस्तारः क्रियते। अस्याः योजनायाः माध्यमेन राज्यस्यानुकूल- जलवायु-सम्पन्नेषु मण्डलेषु तैल-तालस्य (ऑयल-पाम्) वैज्ञानिक-कृषि-पद्धतेः संवर्धनेन सह कृषकेभ्यः दीर्घकालीन-स्थिराय-सम्प्राप्तेः अवसरोपलम्भनम्, उद्योग-नियोजन-सृजनम्, तैलोत्पादक-यन्त्रालयेषु संस्करणघटकेषु च वैयक्तिक-निवेशस्य समभिवृद्धिः इति विषयेषु विशेषः अवधानः दीयते। कृषिमन्त्री विजयकुमारसिन्हा प्रत्यपादयत् यद् बिहारस्य कृषकाणाम् आय-वर्धनार्थं कृषि-कर्म च लाभप्रदं वैविध्यपूर्णं च सम्पादयितुं राज्य-सर्वकारः सततं नूत्नासु सम्भावनासु कार्यरतः वर्तते। तैल-तालम् एतादृशं दीर्घकालीकं सस्यं वर्तते, येन अनुकूलानां क्षेत्राणां कृषकेभ्यः अतिरिक्तस्य स्थायिनश्च लाभस्य महत्तरः मार्गः उद्घाटितो भवति। अनेन सहैव देशस्य खाद्य-तैल-मात्रायाः पूर्तये आयातनिर्भरतां न्यूनीकर्तुं चाप्ययं प्रयासः श्लाघनीयः। अस्माकं लक्ष्यं कृषीवलान् केवलं सस्योत्पादन-मात्रेण परिसीमितान् अकृत्वा पादप-सामग्रीतः आरभ्य सेचनम्, उत्पादनम्, क्रयणम्, संस्करणं, विपणि-व्यवस्थापनञ्च यावत् एकां समग्रां व्यवस्थां कल्पयितुम् अस्ति।भारतदेशः साम्प्रतं स्वकीय- खाद्य- तैल- आवश्यकतायाः प्रायः षट्पञ्चाशत्तः सप्तपञ्चाशत्- प्रतिशतं (५६%-५७%) यावत् भागं वैदेशिक- राष्ट्रेभ्यः आयातं करोति। अस्मिन् आयाते निर्भरताह्रासाय बिहारस्य अनुकूल- वातावरणयुक्तेषु जनपदेषु तैलतालस्य वैज्ञानिककृषिः संवर्धिष्यते। प्रथम-चरणे अररिया, पूर्णिया, किशनगञ्ज, पूर्वचम्पारण, पश्चिम-चम्पारण- जनपदाः एतदर्थं मनोनीताः सन्ति। NMEO-OP योजनायाः अन्तः तैल-ताल-कृषिं स्वीकुर्वद्भ्यः कृषकेभ्यः पादप-सामग्रीक्रयणार्थं प्रति- हेक्टेयरं नवविंशति-सहस्ररूप्यकाणि (₹२९,०००) यावत् वित्तीय-साहाय्यं प्रदास्यते। तदतिरिच्य पादपारोपणाद् अनन्तरं प्रारम्भिकेषु चतुर्षु वर्षेषु सस्य-संरक्षणाय, अवशिष्टभूभागेषु च अन्तरवर्ती-सस्यकृषये (इण्टर-क्रॉपिङ्ग) प्रति हेक्टेयरं पञ्चशताधिक- दशसहस्ररूप्यकाणां (₹१०,५००) विशिष्टः अनुदानः समुपलप्स्यते। अनेन कृषकाणां प्रारम्भिकवर्षेषु सस्य-प्रबन्धनाय महती सहायता भविष्यति। अन्ताराष्ट्रिय-विपण्याम् अपक्वे तालतैले जायमानान् मूल्यसंक्षोभान् संलक्ष्य कृषकाणां सम्भावित-वित्तीयहानितः सुरक्षार्थं 'व्यवहार्य-मूल्यस्य' व्यवस्था विहिता। यदा विपणिमूल्येषु न्यूनता समायास्यति, तदा नियमानुसारेण केन्द्र-सर्वकारेण अन्तरराशेः पूर्तिः विधास्यते। अनेन साकं जलसंरक्षणाय सूक्ष्मसेचनप्रणाल्याः, लवन-संस्करण- सम्बन्धि- कृषियन्त्राणां च कृते केन्द्र-सर्वकारस्य नियमानुसारेण अनुदानं प्रदास्यते।कृषकेभ्यः समुचित-विपणि-सम्पर्काय उत्पादितस्य तैलतालस्य सद्यस्क-फलगुच्छानां क्रयणाय संस्करण- उद्योगैः सह प्रत्यक्षः दृढश्च सम्बन्धः स्थापयिष्यते। अनेन उत्पादनेन सह विक्रयस्यापि श्रेष्ठा व्यवस्था सेत्स्यति, राज्ये च उत्पादनात् संस्करणपर्यन्तं समग्रा मूल्य-शृङ्खला सुदृढा भविष्यति। कृषिमन्त्रिणा विजयकुमारसिन्हेन निगदितं यत्-



"तैल-तालकृषेः प्रोत्साहनं न केवलम् एका नूतना सस्यपद्धतिः, अपि तु कृषकेभ्यः दीर्घकालीन-सम्पदः, विपणि- सम्पर्कस्य, कृषिक्षेत्रे च नूतन-निवेशप्राप्तेः व्यापकोऽभियानः अस्ति। बिहारसर्वकारः कृषकेभ्यः योजनालाभेन सह प्राविधिक-मार्गदर्शनं सुदृढं विपणिञ्च दातुं कटिबद्धः।"तेनोक्तं यद् इयं दीर्घकालीना कृषिः प्रारम्भिक- संस्करणात् परं प्रायः पञ्चविंशतितः त्रिंशत्-वर्षाणि (२५–३० वर्षाणि) यावत् निरन्तरम् उत्पादनं दातुं समर्था वर्तते। अत एव पारम्परिक-सस्यैः साकं तैल-तालस्य कृष्या कृषकाः स्वकीयाम् आय-सरणिं विविधीकर्तुं शक्नुवन्ति। कृषिमन्त्रिणा राज्यस्य कृषकाः समाहूताः यत्- "यत्र यत्र भूमिः जलवायुश्चानुकूला वर्तते, तत्र कृषीवलाः पारम्परिकसस्यैः सह अस्या अपि कृषेः अङ्गीकारं विचारयेयुः। राज्यसर्वकारः सर्वविधं साहाय्यं, प्राविधिकपरामर्शं, विपणिसहयोगञ्च विस्तारयिष्यति।" तेन विज्ञापितं यद् अस्याः योजनायाः लाभाय कृषकाः स्वसमीपस्थे मण्डल-उद्यानकार्यालये अथवा प्रखण्ड- उद्यान-पदाधिकारिणा सह सम्पर्कं साधयितुं शक्नुवन्ति। तदतिरिच्य विभागीय- अभिलेख- माध्यमेन 'बिहार- कृषि- अनुप्रयोगेन' (बिहार कृषि ऐप) चापि योजनायाः विवरणं सम्प्राप्य आवेदनं कर्तुं शक्यते।



# मधुबनीनगरे मिथिलालोकचित्र- कलायाः नवसत्रस्य शुभारम्भः

**मधुबनी१८ सितंबर २०२६ हिम संस्कृतवार्ता: डॉ विमलेश झा**

मिथिलायाः समृद्धायाः चित्रकलापरम्परायाः संरक्षणाय तस्याः नवसंतत्या सह संयोजनाय च शुक्रवासरे बिहारराज्यस्य मधुबनीमण्डलस्य सौराठस्थिते मिथिलाचित्रकलासंस्थाने ‘बैचलर इन मिथिला फोक पेन्टिङ्ग’ इत्यस्य पाठ्यक्रमस्य नवसत्रस्य शुभारम्भः अभवत्। अस्मिन् अवसरे कलासाहित्य-इतिहास -नाट्य-संस्कृतिक्षेत्रेषु सम्बद्धाः प्रतिष्ठिताः विद्वांसः, कलाकाराः शिक्षाविदश्च नवप्रवेशितानां विद्यार्थिनां मार्गदर्शनं कृतवन्तः। कार्यक्रमे मिथिलायाः कलापरम्परायाः संरक्षणस्य, संवर्धनस्य तथा नवसन्ततेः तया सह संयोजनस्य महत्त्वं प्रतिपादितम्। नवसत्रस्य शुभारम्भावसरे संस्थानस्य परिसरे कला-संस्कृतिक्षेत्रयोः अनेके प्रमुखाः व्यक्तयः उपस्थिताः आसन्। पद्मश्रीपुरस्कृतकलाकारैः सह विद्वांसः उपस्थिताःकार्यक्रमे नाट्यक्षेत्रस्य प्रसिद्धः विद्वान् महेन्द्रमलङ्गिया, इतिहासकारः नरेन्द्रनारायणसिंहः ‘निराला’, पद्मश्रीपुरस्कृता बौआदेवी, पद्मश्रीपुरस्कृतः शिवनपासवानः, पद्मश्रीपुरस्कृता दुलारीदेवी, इतिहासविभागस्य पूर्वविभागाध्यक्षा डा. इन्दिराझा तथा साहित्य-अकादमी-पुरस्कारप्राप्तः अजीतआजादः च उपस्थिताः आसन्। एतदतिरिक्तं संस्थानस्य निदेशकः चन्द्रशेखरप्रसादसिंहः, जिलाकलासंस्कृतिपदाधिकारी-सह-उपनिदेशकः मिथिलाचित्रकलासंस्थानस्य नीतीशकुमारः, कनिष्ठाचार्या डा. रानीझा, सञ्जयकुमारजायसवालः, प्रतीकप्रभाकरः, लेखापदाधिकारी सुरेन्द्रप्रसादयादवः तथा सौराठक्षेत्रस्य बसन्तीमिश्रा अपि कार्यक्रमे उपस्थिताः आसन्।कार्यक्रमे मिथिलाचित्रकलायाः अनेके कलाकाराः तथा संस्थानस्य शिक्षकाः कर्मकराश्च उपस्थिताः अभवन्। नवप्रवेशितविद्यार्थिभ्यः कला-साहित्य-इतिहास-नाट्य-संस्कृतिक्षेत्रेषु कार्यरतैः अतिथिभिः स्वानुभवानां माध्यमेन बहुमूल्यं मार्गदर्शनं प्राप्तम्।वक्तारः विद्यार्थिनः मिथिलायाः समृद्धां लोकचित्रकलापरम्परां ज्ञातुं, तस्याः संरक्षणं कर्तुं तथा आधुनिकसमये तस्याः विकासाय सृजनात्मकप्रयासान् कर्तुं प्रेरितवन्तः।कार्यक्रमस्य मञ्चसञ्चालनं श्री आनन्दमोहनझा अकरोत्। नवसत्रस्य शुभारम्भेन संस्थानपरिसरे उत्साहपूर्णं सांस्कृतिकं च वातावरणं निर्मितम् अभवत्।

# भागलपुरमण्डलस्य एकचारीग्रामे गणेशपूजामहोत्सवस्य समापनम्



**भागलपुरम्। १८ सितंबर २०२६ हिमसंस्कृतवार्ताः डॉ विमलेश झा**

बिहारराज्यस्य भागलपुरजनपदस्य एकचारीग्रामे अखण्डसमाजस्य गणेशपूजासमित्याः तत्वावधाने चतुर्दिवसीयः गणेशपूजामहोत्सवः हर्षोल्लासेन सम्पन्नः जातः। महोत्सवस्य अन्तिमे दिवसे नृत्यप्रतियोगितायाः अन्तिमचरणस्य आयोजनम् अभवत्। चयनिताः कलाकाराः मनोहराभिः नृत्यप्रस्तुतिभिः दर्शकानां मनांसि आकृष्टवन्तः। कलाकारैः गणपतेः वन्दना विविधैः गीतैः सह नृत्यप्रस्तुतयश्च प्रदर्शिताः। सम्पूर्णं परिसरं करतलध्वनिभिः ‘गणपति बप्पा मोरया’ इति जयघोषेण च मुखरितम् अभवत्। अन्तिमप्रतियोगितायां पश्चिमबङ्गालझारखण्डप्रभृतिभ्यः राज्येभ्यः कलाकाराः समागताः आसन्। ते स्वकीयया कलाप्रतिभया नृत्यकौशलं च उत्कृष्टतया प्रदर्शितवन्तः। बालकलाकाराः अपि दर्शकानां विशेषाकर्षणस्य केन्द्रम् अभवन्। महोत्सवस्य सम्पूर्णे आयोजने श्रद्धालूनां मध्ये विशेषः उत्साहः दृश्यते स्म। भगवतः श्रीगणेशस्य पूजाऽर्चना विधिविधानपूर्वकं भक्तिभावेन च सम्पन्ना अभवत्। समितेः सदस्यैः उक्तं यत् पूजाकार्यं काशीतः समागतैः पण्डितैः कारितम्। मन्त्रपाठः, आरती तथा गणपतिबप्पा इति जयघोषेण सम्पूर्णं वातावरणं भक्तिमयं जातम्। पूजासमितेः अध्यक्षः अनुपान्तसिंहः अवदत् यत् अखण्डसमाजगणेशपूजासमित्यां प्रतिवर्षम् एकचारी-भूलग्रामयोः द्वयोः पञ्चायतयोः ग्रामवासिनः सम्मिलिताः भवन्ति। चतुर्दिवसीये अस्मिन् आयोजने सम्पूर्णक्षेत्रस्य जनाः एकस्मिन् मञ्चे समागच्छन्ति। अयं गणेशपूजामहोत्सवः केवलं धार्मिकः कार्यक्रमः न, अपि तु समाजस्य एकीकरणस्य पारस्परिकभ्रातृत्वस्य च सशक्तं माध्यमम् अस्ति। महोत्सवकाले प्रतिवर्षं श्रद्धालूनां ग्रामवासिनां च उत्साहः वर्धमानः दृश्यते। पूजायाः सांस्कृतिककार्यक्रमेषु प्रतियोगितासु च बहवः जनाः उत्साहेन भागं गृह्णन्ति। आयोजनस्य प्रमुखं आकर्षणं भगवान् गणेशस्य प्रतिमायाः विसर्जनशोभायात्रा भवति। अस्यां शोभायात्रायां समीपस्थग्रामेभ्यः जनाः तथा बहुदूरात् अपि श्रद्धालवः समागच्छन्ति। विसर्जनशोभायात्रायां प्रायः दशसहस्रं श्रद्धालवः भागं गृह्णन्ति इति परम्परा अस्ति। समितेः संयोजकः सौरभसुमनः अवदत् यत् अखण्डसमाजगणेशपूजासमित्याः गठनानन्तरं क्षेत्रस्य जनानां मध्ये पारस्परिकसम्बन्धः एकता च निरन्तरं सुदृढा अभवत्। गणपतिबप्पायाः कृपया पूजारम्भानन्तरं क्षेत्रे विशिष्टं धार्मिकं सामाजिकं च वातावरणं दृश्यते। पूजासमित्याः सम्बद्धाः जनाः परस्परस्य सुखदुःखयोः सहायतार्थं सदैव तत्पराः तिष्ठन्ति। गणेशपूजायाः अवसरः जातिपन्थभेदान् अतिक्रम्य सर्वान् जनान् एकत्र समानीय भगवतः गणेशस्य आराधनायां प्रवर्तयति। अयमेव अस्य आयोजनस्य प्रमुखं वैशिष्ट्यम् अस्ति। महोत्सवस्य समापनावसरे आयोजकैः सर्वेषां श्रद्धालूनां, कलाकाराणां तथा सहयोगिनां कृते कृतज्ञता प्रकटिता। सम्पूर्णं आयोजनं धार्मिकश्रद्धया, सांस्कृतिककार्यक्रमैः सामाजिकैकतया च परिपूर्णं जातम्।